पुत्राः पितॄन् निःश्वासपीडनात्”। इमे स्मृत्यर्थे इति । ऋणमिव ऋणं पितृमातृकुलस्येदमवश्यं परिशोध्यम् इत्यर्थः एवमादिवचनैः कन्यासम्बन्धेनैव श्राद्धप्रतिपादनात् एतस्यापि वचनस्य तदेकवाक्यतया सौराश्विनपरत्वम् । सौरपरत्वे लक्षणा स्यादिति चेन्न पौर्णमास्यन्तेऽपि तथात्वात् । अतः सिंहोपक्रमे कृष्णपक्षे कन्यासम्बन्धिन्येव भागे श्राद्धं स्यात् न सिंहसम्बन्धिनि अतः पक्षश्राद्धं तत्र निवर्त्तत एव त्रिभागहीनमित्यादयः पक्षास्तत्र यथासम्भवं योजनीयाः । कन्यासम्बन्धिन्यपरपक्षे श्राद्धविधानात् उपक्रमे सिंहसम्बन्धेऽपि पक्षस्य कन्यासम्बन्धोऽस्त्येवेति चेन्न एकस्य पक्षावयविनः पञ्चदशतिथ्यात्मकस्याभावात् अत एव पञ्चदशब्राह्मणसमुदायमध्ये एकस्य पुरुषोत्तमस्पर्शे न सर्व्वेषां पुण्यभागिता एतन्मूलमेवेदं वचनं “कृत्तिकादिभरण्यन्तं वारा वा रविसप्तकाः । नैते संयोगमात्रेण पुनन्ति सकलां तिथिम्”। एकस्य तिथ्यवयविनोऽभावादित्यर्थः इतरथा तु पूर्व्वदिने रात्रौ चतुर्थीभौमवारयोगे बुधवारेऽपि भौमयुक्तचतुर्थीविहितस्नानदानाद्यापत्तेः । यदा समस्त एवापरपक्षः सिंहार्के निपतेत् तदा तं पक्षं विहाय कन्यागतापरपक्ष एव श्राद्धम् । नन्वेवं पञ्चमपक्षविरोधः । तथा कार्ष्णाजिनिः “शक्रध्वजनिपाताद्धो यः स्यात् पक्षस्तु पञ्चमः । स विज्ञेयोऽपरः पक्षः श्राद्धं तत्र विधीयते । पुत्त्रमायुर्धनं धान्यं भूतिमारोग्यमेव च । प्राप्नोति पञ्चमे दत्त्वा श्राद्धं कामांस्तथा परान् । एतानेव हि हिंसन्ति पञ्चमं यो व्यतिक्रमेत् । तस्मान्नातिक्रमेद्धि विद्वान् पञ्चमे पैतृकं विधिम्”। तथा जातूकर्ण्यः “आषाढीमवधिं कृत्वा यः स्यात् पक्षस्तु पञ्चमः । तत्र श्राद्धं प्रकुर्व्वीत कन्यां गच्छतु वा न वा”। जावालः “अगतेऽपि रवौ कन्यां श्राद्धं कुर्व्वीत यत्नतः । आषाढ्याः पञ्चमः पक्षः प्रशस्तः पितृकर्म्मणि”। उच्यते एतेषां वचनानां भोजदेवप्रभृतिभिरलिखितत्वेन प्रामाण्याभावात् प्रत्युत पुत्त्रादिफलसम्बन्धावगमात् काम्यं तद्भविष्यति । कन्यागतस्य च नित्यत्वं प्रागेव दर्शितम् । न च काम्याधिकारनित्याधिकारयोरेकशास्त्रार्थत्वं यावज्जीवाधिकरणविरोधात् । तद्यदि फलार्थितया कन्यासम्बन्धरहित एव श्राद्धं कृतं तथापि कन्यायामवश्यं कर्त्तव्यम् । वस्तुतस्तु श्राद्धभेदे विधिगौरवापत्तेः कन्यागतश्राद्ध एव फलार्थितया पञ्चमपक्षीयगुणफलविधिः तदा च केवलपञ्चमपक्षे श्राद्धमसङ्कृतमेव “कन्यां गच्छतु वा नवेति” पञ्चमपक्षस्तुत्यर्थं न तु कन्यासम्बन्धाभावेऽपि श्राद्धविधानपरं प्राप्ते कन्यागतश्राद्धे गुणफलविधित्वात् तदसङ्कृतं ब्रह्मपुराणे “पौर्णमास्यन्तमासेनैव समस्ततिथिकृत्याभिधानात् अश्वयुक्शब्दस्यापि पौर्णमास्यन्तपरत्वात् न सौराश्विनपरत्वम् “आश्वयुज्यां तु कृष्णायां त्रयोदश्यां मघासु च” इति ब्रह्मपुराण एव अश्वयुक्शब्दस्यापि पौर्णमास्यन्तपरत्वावधारणाच्च पौर्णमास्यन्ताश्विन एव मघा त्रयोदशी भवति न दर्शान्ते, लक्षणा च सौरेऽप्यविशिष्टा । अतएव न मुख्यत्वाय दर्शान्तपरतापि कृत्स्नतात्पर्य्यानुपपत्त्या लक्षणायां धान्यमस्यधिकरणे दर्शितत्वात् । इदन्तु उच्यते उक्तयुक्तेः पौर्णमास्यन्ताश्विनपरत्वे कन्यानिरपेक्षपञ्चमपक्षे पक्षश्राद्धादिकल्पा नित्यतयाऽवगम्यन्ते न कन्याविशिष्टा निरपेक्षश्रुतेः अत एव न गुणफलविधिः। अत एव कन्यासम्बन्धानुद्देनैव प्रौष्ठपद्यूर्द्ध्वं पञ्चमपक्षे कृष्णपक्षश्राद्धादिकं दर्शयति विष्णुधर्म्मोत्तरप्रथमकाण्डम् “उत्तरादयनात् श्राद्धं श्रेष्ठं स्यात् दक्षिणायनम् । चातुर्म्मास्यञ्च तत्रापि प्रसुप्ते केशवे हितम् । प्रौष्ठपद्याः परः पक्षस्तत्रापि च विशेषतः । पञ्चम्यूर्द्ध्वञ्च तत्रापि दशम्यूर्द्ध्वमतोऽप्यति । मघा युक्ता च तत्रापि शस्ता राजंस्त्रयोदशी । तत्राक्षयं भवेत् श्राद्धं मधुना पायसेन तु । सर्व्वस्वेनापि कर्त्तव्यं श्राद्धमत्र नराधिप ! । परान्नभोजी त्वपचः श्राद्धमत्र तु कारयेत्”। यानि च कन्याविषयाणि वचनानि तानि पञ्चमपक्षानपेक्षश्राद्धान्तरविधायकान्येव । कन्याप्रौष्ठपद्यूर्द्ध्वपञ्चमपक्षसमुच्चयेऽपि कन्यागतस्यापि श्राद्धस्य नित्यत्वेनावगम्यमानस्य तन्त्रादेव सिद्धेर्न पृथक्करणम् । यदा न कन्यासमुच्चयस्तदा कन्यायामपि नित्यत्वात् कर्त्तव्यमेव परन्तु पक्षश्राद्धादिकल्पेषु प्रामाणाभावात् सकृत्कृते कृतः शास्त्रार्थ इति न्यायात् सकृदेव श्राद्धं कर्त्तव्यम् । अधिमासपाते तत्र श्राद्धं न कर्त्तव्यं यथा लघुहारीतः “सपिण्डीकरणादूर्द्ध्वं यत्किञ्चित् श्राद्धिकं भवेत् । इष्टं वाप्यथ वा पूर्त्तं तन्न कुर्य्यान्मलिम्लुचे”। एवमधिमासदोषेणापाटवादिना च तत्र श्राद्धाकरणे तुलायां कर्त्तव्यतामाह ब्रह्मपुराणे “यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः । तावत् श्राद्धस्य कालः स्यात् शून्यं प्रेतपुरं तदा”। अत्र कन्यातुलयोर्दिवाकरावस्थितेः क्रमादेव प्राप्तत्वात् क्रमात् श्राद्धस्य कालः स्यादित्यन्वयः मुख्यकल्पानुकल्पभावेनेत्यर्थः ।